Shivastutishlokah

ஶிவஸ்துதிஶ்லோகா:

Document Information

Text title : Shivastutishlokah

File name : shivastutishlokAH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | vAvRittashlokAH ||adhyAyaH 1 | 1751||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# ஶிவஸ்துதிஶ்லோகா:

பா3ல: -

கௌ3ரீமநோஹரபதா3ம்பு3ஜமாத3ரேண வந்தே3
முகுந்த3நயநாம்பு3ஜபூஜிதம் மே ।
ஆநந்த3ஸூந்த3ரமரந்த3விநோத3தா4ரா
தா4ராவரம் ஸுக2த3மாஶு முஹு: ஸ்மராமி ॥ 16.4 ॥

உமாகடிதடஸ்பு2ரத்கரிவராநநாலோகந-
ப்ரஸந்நஹ்ரு'த3யம் தி4யா ஸத3யமிந்து3சூட3ம் ம்ரு'ட3ம் ।
உமாபரிப்3ரு'ட4ம் ப4ஜே ப4ஜநமாத்ரு'த3த்தேப்ஸிதம்
ஸ்மிதாநநமநாமயம் ப்ரியமுமாஸஹாயம் முதா3 ॥ 16.4 ॥

ராஜ்ஞீ -

ஹாரோபஹாரபரிகல்பிதநீரதா4ரா-
மாஹாரமேத்ய குருதோத3ரபூரணாய ।
விஶ்வேஶ்வரஸ்மரணமேவ கரோமி சித்தே
க்ரு'த்வா ஶிவாபதிபதா3ம்பு3ஜமாத3ரேண ॥ 18.113 ॥

ரதிபதிஹிதபூ4தக்ரோட3யா க்ரீட3யாऽலம்
ரமணிசரணகா4தை: தத்கராவேஷ்டநைஶ்ச ।
அலமலமநுவேலம் காலகாலாப3லாயா:
சரணகமலஶோபா4மேவ நித்யம் ஸ்மராமி ॥ 18.114 ॥

கௌ3ரீமநோஹரபதா3ம்பு3ஜமாத3ரேண ஸ்ம்ரு'த்வா
தரந்தி க2லு பாதகபாவகாதீ4ந் ।
தஸ்மாத3நந்யஶரண: ஶிவபாத3பத்3மம்
பத்3மாபதிப்ரியமஹம் ஶரணம் வ்ரஜாமி ॥ 18.115 ॥

நாந்யந்மநோஹரமகா4பஹமஸ்தி லோகே
கௌ3ரீமநோஹரபதா3ம்பு3ருஹம் விஹாய ।
தத்கேவலம் ஶரணமித்யஹமாத3ரேண ஸ்ம்ரு'த்வா

வஸாமி விபிநே ஶிவமந்தி³ரேஷு ॥ 18.116 ॥

ஸம்ஸாரது:³க²மக⁴கோடிகுலாகுலத்வாத்
த்யாஜ்யம் மநாக³பி ந தேந ஸுக²ம் கதா³பி ।
ஜந்மவ்யபாயகரணம் பரமிந்து³மௌலிபாதா³ர-
விந்த³ப⁴ஜநம் ப்ரவத³ந்தி தீ⁴ரா: ॥ 18.117 ॥

அஹோ மஹாபாதகராஶிகோடிதூலாநல: ஶங்கரலிங்க³பூஜா ।
ஸா து³ர்லபா⁴ பா⁴க்³யவஶேந லோகே தபஸ்யயா ஸ்யாத் ஸுலபா⁴ விமுக்த்யை ॥ 18.121 ॥

சித்ரகேது: -
ப⁴வாநீபதே பாஹி பாஹி த்ரிஶூலிந் ப⁴வத்பாது³காராத⁴கா லோகநேந ।
மநோ மே ப்ரவ்ரு’த்தம் ப⁴வத்பாத³பத்³மே ப்ரஞ்ஜஸப்ரவாஹஸ்தவாயம் மஹேஶ ॥ 22.97 ॥

ஸத்யமூர்தி: -
ப்ரபா⁴வமீஶார்சநதத்பராணும் வக்தும் ந ஶக்தோऽஸ்தி ந வேத³ராஶி: ।
ஶ்ராந்தாஶ்ச வேதா³ந்தவிசாரதாந்தாஸ்தே ஶாங்கராராத⁴நஸேவகா: ஸ்யு: ॥ 46.210 ॥

த⁴ந்யம் சித்தம் ஶங்கரத்⁴யாநலோலம் த⁴ந்யே நேத்ரே லிங்க³ஸந்த³ர்ஶநேந ।
த⁴ந்யௌ ஹஸ்த லிங்க³ஸம்பூஜநாத்³யை: த⁴ந்யா ஜிஹ்வா ஶாங்க³ஸங்கீர்தநேந ॥ 46.213 ॥

॥ இதி ஶிவரஹஸ்யாந்தர்க³தே ஹராக்²யே ஶிவஸ்துதிஶ்லோகா: ஸம்பூர்ண: ॥

- ॥ ஶ்ரீஶிவரஹஸ்யம் । ஹராக்²ய: த்ரு’தீயாம்ஶ: । உத்தரார்த⁴ம் । வாவ்ரு’த்தஶ்லோகா: ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . vAvRRittashlokAH ..

Proofread by Ruma Dewan

*Shivastutishlokah*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*